শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীশেষশর্মাভিনৱ কৃতা

# ॥ শ্রী পদ্মাৱতীনৱরত্নমালিকাস্তুতিঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী পদ্মাৱতীনৱরত্নমালিকাস্তুতিঃ ॥

শ্রীমান্ যস্যাঃ প্রিযস্সন্ সকলমপি জগজ্জঙ্গমস্থাৱরাদ্যং
স্বর্ভূপাতালভেদং ৱিৱিধৱিধমহাশিল্পসামর্থ্যসিদ্ধম্।
রঞ্জন্ ব্রহ্মামরেন্দ্রৈস্ত্রিভুৱনজনকঃ স্তূযতে ভূরিশো যঃ
সা ৱিষ্ণোরেকপত্নী ত্রিভুৱনজননী পাতু পদ্মাৱতী নঃ ॥ 1 ॥

শ্রীশৃঙ্গারৈকদেৱীং ৱিধিমুখসুমনঃকোটিকোটীরজাগ্রদ্ -
রত্নজ্যোৎস্নাপ্রসারপ্রকটিতচরণাম্ভোজনীরাজিতার্চাম্।
গীর্ৱাণস্ত্রৈণৱাণীপরিফণিতমহাকীর্তিসৌভাগ্যভাগ্যাং
হেলানির্দগ্ধদৈন্যশ্রমৱিষমমহারণ্যগণ্যাং নমামি ॥ 2 ॥

ৱিদ্যুৎকোটিপ্রকাশাং ৱিৱিধমণিগণোন্নিদ্রসুস্নিগ্ধশোভা -
সম্পৎসম্পূর্ণহারাদ্যভিনৱৱিভৱালঙ্ক্রিযোল্লাসিকণ্ঠাম্।
আদ্যাং ৱিদ্যোতমানস্মিতরুচিরচিতানল্পচন্দ্রপ্রকাশাং
পদ্মাং পদ্মাযতাক্ষীং পদনলিননমৎপদ্মসদ্মাং নমামি ॥ 3 ॥

শশ্ৱত্তস্যাঃ শ্রযেঽহং চরণসরসিজং শার্ঙ্গপাণেঃ পুরন্ধ্র্যাঃ
স্তোকং যস্যাঃ প্রসাদঃ প্রসরতি মনুজে ক্রূরদারিদ্র্যদগ্ধে।
সোঽযং সদ্যোঽনৱদ্যস্থিরতররুচিরশ্রেষ্ঠভূযিষ্ঠনৱ্য -
স্তৱ্যপ্রাসাদপঙ্ক্তিপ্রসিতবহুৱিধপ্রাভৱো বোভৱীতি ॥ 4 ॥

সৌন্দর্যোদ্বেলহেমাম্বুজমহিতমহাসিংহপীঠাশ্রযাঢ্যাং
পুষ্যন্নীলারৱিন্দপ্রতিমৱরকৃপাপূরসম্পূর্ণনেত্রাম্।
জ্যোৎস্নাপীযূষধারাৱহনৱসুষমক্ষৌমধামোজ্জ্ৱলাঙ্গীং
ৱন্দে সিদ্ধেশচেতস্সরসিজনিলযাং চক্রিসৌভাগ্যঋদ্ধিম্ ॥ 5 ॥

সংসারক্লেশহন্ত্রীং স্মিতরুচিরমুখীং সারশৃঙ্গারশোভাং
সর্ৱৈশ্ৱর্যপ্রদাত্রীং সরসিজনযনাং সংস্তুতাং সাধুবৃন্দৈঃ।
সংসিদ্ধস্নিগ্ধভাৱাং সুরহিতচরিতাং সিন্ধুরাজাত্মভূতাং
সেৱে সংভাৱনীযানুপমিতমহিমাং সচ্চিদানন্দরূপাম্॥ **6**॥

সিদ্ধস্বর্ণোপমানদ্যুতিলসিততনুং স্নিগ্ধসম্পূর্ণচন্দ্র -
ৱ্রীডাসংপাদিৱক্ত্রাং তিলসুমৱিজযোদ্যোগনির্নিদ্রনাসাম্।
তাদাৎৱোৎফুল্লনীলাম্বুজহসনচণাত্মীযচক্ষুঃ প্রকাশাং
বালশ্রীলপ্রৱালপ্রিযসখচরণদ্ৱন্দরম্যাং ভজেঽহম্॥ **7**॥

যাং দেৱীং মৌনিৱর্যাঃ শ্রযদমরৱধূমৌলিমাল্যার্চিতাঙ্ঘ্রিং
সংসারাসারৱারান্নিধিতরতরণে সর্ৱদা ভাৱযন্তে।
শ্রীকারোত্তুঙ্গরত্নপ্রচুরিতকনকস্নিগ্ধশুদ্ধান্তলীলাং
তাং শশ্ৱৎপাদপদ্মশ্রযদখিলহৃদাহ্লাদিনীং হ্লাদযেঽহম্॥ **8**॥

আকাশাধীশপুত্রীং শ্রিতজননিৱহাধীনচেতঃ প্রৱৃত্তিং
ৱন্দে শ্রীৱেঙ্কটেশপ্রভুৱরমহিষীং দীনচিত্তপ্রতোষাম্।
পুষ্যৎপাদারৱিন্দপ্রসৃমরসুমহশ্শামিতস্বাশ্রিতান্ত -
স্তামিস্রাং তত্ত্বরূপাং শুকপুরনিলযাং সর্ৱসৌভাগ্যদাত্রীম্॥ **9**॥

শ্রীশেষশর্মাভিনৱোপকৢপ্তা
প্রিযেণ ভক্ত্যা চ সমর্পিতেযম্।
পদ্মাৱতীমঙ্গলকণ্ঠভূষা
ৱিরাজতাং শ্রীনৱরত্নমালা॥ **10**॥

॥ শ্রী পদ্মাৱতীনৱরত্নমালিকাস্তুতিঃ সমাপ্তা॥